**झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची**

**कक्षा- नवमी वार्षिकी परीक्षा 2024-25 विषय:- संस्कृतम्**

**समय:- 90 निमेषाः आदर्शप्रश्नपत्रम् पूर्णांका: - 40**

**(बहुविकल्पीयाः प्रश्नाः)**

सामान्यनिर्देशाः-

- अस्मिन् प्रश्नपत्रे चत्वारिंशत् (40) प्रश्नाः। (इस प्रश्न-पत्र में 40 प्रश्न हैं।)
- सर्वे प्रश्नाः अनिवार्याः। (सभी प्रश्न अनिवार्य हैं।)
- प्रत्येक-प्रश्नार्थं एकोऽङ्को निर्धारितः। (प्रत्येक प्रश्न के लिए एक अंक निर्धारित है।)
- प्रत्येक-प्रश्नस्य चत्वारो विकल्पाः। उचितविकल्पं चिनुत । (प्रत्येक प्रश्न के चार विकल्प दिए गए हैं। उचित विकल्प का चयन करें।)
- अनुचितोत्तरार्थं कोऽपि नकारात्मकाङ्को नास्ति। (गलत उत्तर के लिए कोई नकारात्मक अंक नहीं है।)

**(खण्ड क)**

**(अपठित- अवबोधनम्)**

**निर्देशः-अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-**

हिमालयस्य पुत्री पार्वती पतिरूपेण शिवं प्राप्तुं कठिनां तपस्यां कृतवती । एकदा एकः वटुः तस्याः आश्रमम् आगच्छत्। सः पार्वतीं तपस्यायाः कारणम् अपृच्छत्। पार्वती तूष्णीम् अतिष्ठत् । तदा पार्वत्याः सखी अवदत् यत् एषा पतिरूपेण शिवं प्राप्तुं तपस्यां करोति । पुनः वटुः अवदत्- यदि एवं तर्हि नोचितम् एतत्।

1. पार्वत्याः आश्रमं कः आगच्छत्?

क.वटुः ख.माता ग.बालकः घ.पशुः

2. वटुः कां तपस्यायाः कारणम् अपृच्छत्?

क.लताम् ख.पार्वतीम् ग.स्नेहाम् घ.सीताम्

3. हिमालयस्य पुत्री का आसीत्?

क.राधा ख.सारिका ग.पार्वती घ.मालती

4. 'पुनः वटुः अवदत्' इत्यत्र कर्तृपदम् किम्?

क. पुनः ख.वटुः ग.अवदत् घ.वदत्

5.”एकदा एकः वटुः तस्याः आश्रमम् आगच्छत्।“अस्मिन् वाक्ये अव्ययपदं किम्?

क. एकदा ख.वटुः ग.आश्रमम् घ.आगच्छत्

**(खण्ड ख)**

**(रचनात्मकं कार्यम्)**

**निर्देशः-प्रधानाध्यापकं प्रति लिखितम् आवेदनपत्रं प्रदत्त- विकल्पेभ्यः पूरयत-**

सेवायाम्,

(6) ----------!

उच्च- विद्यालयः पतरातू, रामगढ़नगरम् ।

विषयः- अवकाशस्य हेतोः आवेदनपत्रम् ।

महाशय,

सविनयं निवेदनम् इदम् अस्ति यत् अहं गतरात्रौ (7)-------पीडितः जातः।अस्मात् कारणात् अहं विद्यालयम् (8)------ असमर्थः अस्मि। चिकित्सकः मम कृते विश्रामं कर्तुं परामर्शं दत्तवान्। अत एव दिनद्वयस्य अवकाशं प्रदाय अनुग्रहं (9) -------भवान्। एतदर्थम् अहं भवतः सदैव आभारी भविष्यामि।

सधन्यवादः।

भवतः आज्ञाकारी (10)-------

ईशानः

कक्षा-नवमी

क्रमांकः-17

तिथिः --------

6.क.पितृचरणाः ख.प्रधानाध्यापक-महोदय ग.महोदय घ.भवतः

7.क.कलमेन ख.चरणेन ग.ज्वरेण घ.बालकेन

8.क.पठितुम् ख.गन्तुम् ग.आगन्तुम् घ.क्रीडितुम्

9.क.करोतु ख.करोति ग.कुर्वन्ति घ.कुरुतः

10.क.पुत्रः ख.सुतः ग.तपः घ.शिष्यः

**(खण्ड ग)**

**(अनुप्रयुक्तव्याकरणम्)**

**निर्देशः- प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत-**

11. 'कलशः' इत्यस्य शब्दस्य वर्णवियोजनं कुरुत-

क.क+ल+श ख.क्+अ+ल्+अ+श्+अः ग.क्+अ+ल+श्+आ घ.क्+अ+ल्+अ+श

12. 'क' इति व्यञ्जनवर्णस्य उच्चारण-स्थानं किम्?

क.दन्तोष्ठः ख.कण्ठोष्ठः ग.ओष्ठः घ.कण्ठः

13.'राम' शब्दस्य तृतीया बहुवचने किं रूपं भवति?

क.रामेण ख.रामाभ्याम् ग.रामैः घ.रामाय

14. 'सभा' शब्दस्य पञ्चमी-बहुवचने किं रूपं भवति?

क.सभाभ्यः ख.सभाः ग.सभा घ.सभासु

15.'पठ्' धातोः लट्लकारे ,मध्यमपुरुषे, बहुवचने रूपं भवति-

क.पठति ख.पठामि ग.पठथ घ.पठतः

16. 'मनोहरः' इति पदे का सन्धिः अस्ति?

क.स्वर सन्धिः   ख.व्यञ्जन सन्धिः   ग.विसर्ग सन्धिः   घ.दीर्घ सन्धिः

17. 'तस्मिन्+एव' अत्र सन्धिः अस्ति -

क.तस्मिनेव   ख.तस्मिन्नेव   ग.तस्मिन्एव   घ.तस्मन्नाव

18.' पठित्वा' धातु- प्रत्ययोः (प्रकृति-प्रत्ययं) विभज्य लिखत-

क.पठ्+वा   ख.पठ+वा   ग.पठ्+क्त्वा   घ.पाठ्+क्त्वा

19. अलं------।रिक्तस्थानाय उचितं विकल्पं चिनुत-

क.विवाद   ख.विवादेन   ग.विवादम्   घ.विवादः

20. विद्यालये -------(4)अध्यापकाः पाठयन्ति।रिक्तस्थानाय उचितं विकल्पं

चिनुत-

क.चत्वारः   ख.चतुराः   ग.चतस्रः   घ.चत्वारि

**(खण्ड घ)**

**(पठित अवबोधनम्)**

**निर्देशः-अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-**

श्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत्। किन्तु तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतः ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणाः अभवन्। तन्द्रालुः बालः लज्जया तेषां दृष्टिपथमपि परिहरन् एकाकी किमपि उद्यानं प्राविशत्।

सः अचिन्तयत् - "विरमन्तु एते वराकाः पुस्तकदासाः। अहं तु आत्मानं विनोदयिष्यामि। सम्प्रति विद्यालयं गत्वा भूयः क्रुद्धस्य उपाध्यायस्य मुखं द्रष्टुं नैव इच्छामि। एते निष्कुटवासिनः प्राणिन एव मम वयस्याः सन्तु इति।

नवोन्मेष शोध नेतृत्व
JCERT

21.कः तन्द्रालुः आसीत् ?

क.काकः   ख.पिकः   ग.बालः   घ.चटकः

22.बालकः कीदृशः आसीत् ?

क.श्रान्तः   ख.खिन्नः   ग.कटुः   घ.मधुकरः

23.कस्मिन् समये सः क्रीडितुम् अगच्छत्?

क.पाठशालागमनवेलायाम्   ख.शाखायाम्   ग.क्रीडावेलायाम्   घ.निशावेलायाम्

24.बालकः विद्यालयं गत्वा कस्य मुखं द्रष्टुं नैव इच्छति?

क.मित्रस्य   ख.उपाध्यायस्य   ग.मधुकरस्य   घ.चटकस्य

**निर्देशः अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-**

**पिबन्ति नद्यः स्वयमेव नाम्भः, स्वयं न खादन्ति फलानि वृक्षाः ।**

**नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ।।**

25.अम्भः(जलम्) स्वयमेव काः न पिबन्ति?

क.नद्यः   ख.वृक्षाः   ग. प्रकृतिः   घ.वारिवाहाः

26.वारिवाहा: किं न अदन्ति?

क.फलम्  ख.सस्यम्  ग.वृक्षम्  घ.भोजनम्

27.वृक्षा: स्वयं कानि न खादन्ति?

क.पुस्तकानि  ख.फलानि  ग.पुष्पाणि  घ.पत्राणि

28.परोपकाराय केषां विभूतय:?

क.अधमानाम्  ख.दुष्टानाम्  ग.सताम्  घ.मानवानाम्

**निर्देशः अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्य: चित्वा लिखत-**

**मल्लिका-** भो! अत्र पूजनं न भविष्यति। अहं स्वसखिभिः सह श्वः प्रातः काशीविश्वनाथमन्दिरं प्रति गमिष्यामि, तत्र गङ्गास्नानं धर्मयात्राञ्च वयं करिष्यामः ।

**चन्दनः-** सखिभिः सह! न मया सह ! (विषादं नाटयति)

**मल्लिका-** आम्। चम्पा, गौरी, माया, मोहिनी, कपिलाद्याः सर्वाः गच्छन्ति। अतः मया सह तवागमनस्य औचित्यं नास्ति। वयं सप्ताहान्ते प्रत्यागमिष्यामः ।तावत्, गृहव्यवस्थां, धेनोः दुग्धदोहनव्यवस्थाञ्च परिपालय ।

29.मल्लिका सखिभिः सह कुत्र गच्छति ?

क. रजरप्पा-मन्दिरम् ख.काशीविश्वनाथ-मन्दिरम्  ग.देवघर-मन्दिरम्

घ. वासुकीनाथमन्दिरम्

30.मल्लिका पूजां समाप्य कदा प्रत्यागमिष्यति ?

क.सप्ताहान्ते ख. मासान्ते ग. वार्षिकान्ते घ. दिनान्ते

31.मल्लिका कस्य यात्रायां गता ?

क.धर्मस्य  ख.शयनस्य  ग. भ्रमणस्य  घ. मिलनस्य

32.मल्लिकाया: अनुपस्थितौ गृहव्यवस्थां क: परिपालयिष्यति?

क.मोहन:  ख.राम:  ग.चन्दन:  घ.कुन्दन:

**निर्देशः अधोलिखित-श्लोकस्य अन्वय: विकल्पेभ्य: चित्वा लिखत-**

**परिधानैरलङ्कारैर्भूषितोऽपि न शोभते।**
**नरो निर्मणिभोगीव सभायां यदि वा गृहे॥**

**अन्वय:-** निर्मणि भोगीव (33)-------सभायां यदि वा गृहे परिधानैः (34)-------- भूषितः अपि (विद्यां विना) न शोभते।

33.क.शिष्य:  ख.नर:  ग.एष:  घ.तपोदत्त:

34.क.शनैः  ख.पुरुषार्थैः  ग.अलङ्कारैः  घ.परिधानैः

**निर्देश:- श्लोकं पठित्वा भावार्थ: करणीय:-**

**ललित-पल्लवे पादपे पुष्पपुञ्जे**

**मलयमारुतोच्चुम्बिते मञ्जुकुञ्जे,**

**स्वनन्तीन्ततिम्प्रेक्ष्य मलिनामलीनाम् ॥निनादय...॥**

**भावार्थ:-** मलयपर्वतात् आगतै: पवनै: चुम्बितेषु (35)------- वृक्षेषु, पुष्पपुञ्जेषु एवं सुन्दरकुञ्जेषु (36)---------गुञ्जायमाना: पङ्क्ती: दृष्ट्वा हे वाणि शारदे त्वं नवीनां वीणां निनादय ।

35. क.शुष्कपल्लवानां ख.हरितपल्लवानां ग.ललितपल्लवानां घ.पल्लवानां

36. क.श्वेतभ्रमराणां ख.कृष्णभ्रमराणां ग.पीतभ्रमराणां घ.रक्तभ्रमराणां

37. ' अध:' इति पदस्य विलोमपदं किम् अस्ति?

क.अन्नमयम् ख.जलम् ग.ऊर्ध्वम् घ.फलम्

38.' विहस्य' इति पदस्य पर्यायपदं किम् अस्ति?

क. हसित्वा ख.खादित्वा ग.पठित्वा घ.कृत्वा

**निर्देश:-रेखाङ्कितपदम् अधिकृत्य प्रश्ननिर्माणं कुरुत-**

39.<u>गुरुगृहं</u> गत्वैव विद्याभ्यास: करणीय:।

क.किम् ख.**कुत्र** ग.कया घ.किमर्थम्

40.कुक्कुर: <u>मानुषाणां</u> मित्रम् अस्ति।

क.केषां ख.काम् ग.कदा घ.केषु

नवोन्मेष शोध नेतृत्व
JCERT

**SANSKRIT CLASS-9**

**SESSION 2024-25**

**MODEL SET ANS KEY**

| | | | |
|---|---|---|---|
| 1. क.वटु: | 11. ख.क्+अ+ल्+अ+श्+अ: | 21. ग.बाल: | 31. क.धर्मस्य |
| 2. ख.पार्वतीम् | 12. घ.कण्ठ: | 22. क.श्रान्त: | 32. ग.चन्दन: |
| 3. ग.पार्वती | 13. ग.रामैः | 23. क.पाठशालागमनवेलायाम् | 33. ख.नर: |
| 4. ख.वटुः | 14. क.सभाभ्य: | 24. ख.उपाध्यायस्य | 34. ग.अलङ्कारैः |
| 5. क. एकदा | 15. ग.पठथ | 25. क.नद्य: | 35. ग.ललितपल्लवानां |
| 6. ख.प्रधानाध्यापक-महोदय | 16. ग.विसर्ग सन्धि: | 26. ख.सस्यम् | 36. ख.कृष्णभ्रमराणां |
| 7. ग.ज्वरेण | 17. ख.तस्मिन्नेव | 27. ख.फलानि | 37. ग.ऊर्ध्वम् |
| 8. ग.आगन्तुम् | 18. ग.पठ्+क्त्वा | 28. ग.सताम् | 38. क. हसित्वा |
| 9. 9.क.करोतु | 19. ख.विवादेन | 29. ख.काशीविश्वनाथ-मन्दिरम् | 39. ख.**कुत्र** |
| 10. घ.शिष्य: | 20. क.चत्वार: | 30. क.सप्ताहान्ते | 40. क.केषां |